श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

## श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये उत्तरकाण्डे

# ॥ सप्तनवतितमः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ सप्तनवतितमः सर्गः ॥

## सीताकर्तृकं शपथग्रहणं रसातले प्रवेशनं च

वाल्मीकिनैवमुक्तस्तु राघवः प्रत्यभाषत।
प्राञ्जलिर्जगतो मध्ये दृष्ट्वा तां वरवर्णिनीम्॥ 7.97.1 ॥

एवमेतन्महाभाग यथा वदसि धर्मवित्।
प्रत्ययस्तु मम ब्रह्मंस्तव वाक्यैरकल्मषैः॥ 7.97.2 ॥

प्रत्ययश्च पुरा वृत्तो वैदेह्याः सुरसन्निधौ।
शपथश्च कृतस्तत्र तेन वेश्म प्रवेशिता॥ 7.97.3 ॥

लोकापवादो बलवान् येन त्यक्ता हि मैथिली।
सेयं लोकभयाद् ब्रह्मन्नपापेत्यभिजानता।
परित्यक्ता मया सीता तद् भवान् क्षन्तुमर्हति॥ 7.97.4 ॥

जानामि चेमौ पुत्रौ मे यमजातौ कुशीलवौ।
शुद्धायां जगतो मध्ये मैथिल्यां प्रीतिरस्तु मे॥ 7.97.5 ॥

अभिप्रायं तु विज्ञाय रामस्य सुरसत्तमाः।
सीतायाः शपथे तस्मिन् महेन्द्राद्या महौजसः॥ 7.97.6 ॥

पितामहं पुरस्कृत्य सर्व एव समागताः।
आदित्या वसवो रुद्रा विश्वेदेवा मरुद्गणाः॥ 7.97.7 ॥

साध्याश्च देवाः सर्वे ते सर्वे च परमर्षयः।
नागाः सुपर्णाः सिद्धाश्च ते सर्वे हृष्टमानसाः॥ **7.97.8**॥

सीताशपथसम्भ्रान्ताः सर्व एव समागताः।
दृष्ट्वा देवानृषींश्चैव राघवः पुनरब्रवीत्॥ **7.97.9**॥

प्रत्ययो मे सुरश्रेष्ठ ऋषिवाक्यैरकल्मषैः।
शुद्धायां जगतो मध्ये वैदेह्यां प्रीतिरस्तु मे॥ **7.97.10**॥

ततो वायुः शुभः पुण्यो दिव्यगन्धो मनोरमः।
तं जनौघं सुरश्रेष्ठो ह्लादयामास सर्वतः॥ **7.97.11**॥

तदद्भुतमिवाचिन्त्यं निरैक्षन्त समाहिताः।
मानवाः सर्वराष्ट्रेभ्यः पूर्वं कृतयुगे यथा॥ **7.97.12**॥

सर्वान् समागतान् दृष्ट्वा सीता काषायवासिनी।
अब्रवीत् प्राञ्जलिर्वाक्यमधोदृष्टिरवाङ्मुखी॥ **7.97.13**॥

यथाहं राघवादन्यं मनसापि न चिन्तये।
तथा मे माधवी देवी विवरं दातुमर्हति॥ **7.97.14**॥

मनसा कर्मणा वाचा यथा रामं समर्चये।
तथा मे माधवी देवी विवरं दातुमर्हति॥ **7.97.15**॥

यथैतत् सत्यमुक्तं मे वेद्मि रामात् परं न च।
तथा मे माधवी देवी विवरं दातुमर्हति॥ **7.97.16**॥

तथा शपन्त्यां वैदेह्यां प्रादुरासीत् तदद्भुतम्।
भूतलादुत्थितं दिव्यं सिंहासनमनुत्तमम्॥ **7.97.17**॥

ध्रियमाणं शिरोभिस्तु नागैरमितविक्रमैः।
दिव्यं दिव्येन वपुषा दिव्यरत्नविभूषितैः॥ **7.97.18**॥

तस्मिंस्तु धरणी देवी बाहुभ्यां गृह्य मैथिलीम्।
स्वागतेनाभिनन्द्यैनामासने चोपवेशयत्॥ **7.97.19**॥

तामासनगतां दृष्ट्वा प्रविशन्तीं रसातलम्।
पुष्पवृष्टिरविच्छिन्ना दिव्या सीतामवाकिरत्॥ **7.97.20**॥

साधुकारश्च सुमहान् देवानां सहसोत्थितः।
साधुसाध्विति वै सीते यस्यास्ते शीलमीदृशम्॥ **7.97.21**॥

एवं बहुविधा वाचो ह्यन्तरिक्षगताः सुराः।
व्याजहुर्हृष्टमनसो दृष्ट्वा सीताप्रवेशनम्॥ **7.97.22**॥

यज्ञवाटगताश्चापि मुनयः सर्व एव ते।
राजानश्च नरव्याघ्रा विस्मयान्नोपरेमिरे॥ **7.97.23**॥

अन्तरिक्षे च भूमौ च सर्वे स्थावरजङ्गमाः।
दानवाश्च महाकायाः पाताले पन्नगाधिपाः॥ **7.97.24**॥

केचिद् विनेदुः संहृष्टाः केचिद् ध्यानपरायणाः।
केचिद् रामं निरीक्षन्ते केचित् सीतामचेतसः॥ **7.97.25**॥

सीताप्रवेशनं दृष्ट्वा तेषामासीत् समागमः।
तन्मुहूर्तमिवात्यर्थं समं सम्मोहितं जगत्॥ **7.97.26**॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
उत्तरकाण्डे सप्तनवतितमः सर्गः॥